प्रीत्यर्थे ॥ श्रीमद्गुरुकवचं महामंत्रजपे विनियोगः ॥ अथ करन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जु
नीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः करतलकरपृ
ष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कव
चाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ इति हृदयादिषडंगः ॥ ॐ स्वगुरुं मंत्रेण देवतां चेन्म
मधूर्वेकं ध्यायेत ॥ दिव्यौघसिद्धिनद्यं गुरुमस्तिरूपं संसारदुःखहरणं मनं द्विभुजं त्रिनेत्रं ॥ वामांगपार्श्विस
कलमनरमेविभूषं ध्यात्वा जपेत्सकलसिद्धिफलप्रदं च ॥१॥ इति ध्यात्वा मानसोपचारैः संपूज्य ॥ ॐ अं गु
ज्ञात्मने पाद्यं० ॥ ॐ जं ज्योतिरसात्मने अर्घ्यं० ॥ ॐ अस्नानात्मने स्नानं० ॥ ॐ विद्यात्मने वस्त्रं० ॥ मी ॥ इति गंधं ॥ ॐ
ऐं ह्रीं श्रीं हं आकाशात्मने पुष्पं सपूजं ॥ इति पुष्पं ॥ ॐ ऐं ह्रीं श्रीं यं वायव्यात्मने धूपं० ॥ इति धूपं ॥ ॐ ऐं ह्रीं
श्रीं रं तेजात्मने दीपं० ॥ इति दीपं ॥ ॐ ऐं ह्रीं श्रीं वं अमृतात्वा स्मिके षट्रसपक्वान्नं महानैवेद्यं स० ॥ इति

© Dharmartha Trust J&K. Digitized by eGangotri

॥गु.क.॥
॥२॥
2

नैवेद्यं० ॥ ऐं ह्रीं श्रीं संशान्त्यात्मने ताम्बूलं० ॥ इति ताम्बूलं० ॥ ऐं ह्रीं श्रीं अनन्तात्मने नीराजनं ॥ इति नी
राजनं ॥ इति पूजाविधिः ॥ अथ ध्यानं ॥ श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं ॥ सिद्धौघं बटुकत्रयं
पदयुगं दूतीक्रमं मण्डलं ॥ वीरेन्द्राष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं श्रीमन्मालिनीमन्त्रराज
सहितं वन्दे गुरोर्मण्डलं ॥१॥ इति ध्यानं ॥ ततः कवचं पठेत् ॥ ॐ प्रकाशानन्दनाथाख्यः शिरो मे रक्षतु सदा
परशिवानन्दनाथो भाले रक्षतु सर्वदा ॥१॥ पराशक्त्यानन्दनाथो भ्रुवोर्मध्ये च रक्षतु ॥ कौलेश्वरानं
दनाथो नेत्रौ मे पातु सर्वदा ॥२॥ शुक्लेश्वरानन्दनाथो श्रोत्रौ मे [illegible] रक्षतु सर्वदा ॥ कुलेश्वरानन्दनाथो नासि
कायां च रक्षतु ॥३॥ कामेश्वरानन्दनाथो मुखं पातु सदा मम ॥ दिव्यौघस्थं मे देहं पातु सर्वशिरः
सदा ॥४॥ कण्ठादिनाभिपर्यन्तं सिद्धौघा गुरवः प्रियं ॥ श्रीभोगानन्दनाथो मे पातु दक्षिणबाहुकं ॥५॥ क्लि
न्नानन्दनाथगुरुः ॥ रक्ष मे वामबाहुकं ॥ समयानन्दनाथश्च स्तने हृदयेऽवतु ॥६॥ सहजानन्दनाथो

॥राम॥
॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

मेकटिनाभीचरक्षतु ॥ एवं सुख्यानंदगुरुः सिद्धौ पार्श्वे रक्षतु वेत्सर्वसंधिषु ॥ ७ ॥ आधारे पातु मानौघगुरुस्तु वः कु
लनायकौ ॥ गगनानंदनाथश्च स्थेवं तु लिंगमंडले ॥ ८ ॥ विश्वानंदनाथगुरुर्मम गुह्यं च रक्षतु ॥ विमला
नंदनाथश्च जानुन्मे रक्षतु वे सदा ॥ ९ ॥ मदनानंदनाथश्च जंघयोः पातु सद्गुरुः ॥ भुवनानंदनाथश्च गुल्फ
योः पातु सर्वदा ॥ १० ॥ लीलानंदनाथगुरुः पादपृष्ठे च रक्षतु ॥ स्वात्मानंदगुरुर्मे पादांगुलीश्च रक्षतु
॥ ११ ॥ कल्लोलानंदनाथश्च रक्षेत्पादतले सदा ॥ इत्येवं मानवौघश्च सर्वेषामादिपादयोः ॥ १२ ॥ गुरुर्मे
रक्षतु वेश्चत्रि सलिले परमो गुरुः ॥ परमात्मा परगुरुस्त्वग्मे रक्षतु वेल्लि ववहन्मे ॥ १३ ॥ परमेष्ठि गुरुः श्वेवर
क्षेद्भूमंडले ॥ शिवादिगुरवः साक्षात्काशी रक्षयेत्सदा ॥ १४ ॥ इंद्रो गुरुः पातु पूर्वे चाग्नेय्यां मग्निमान्
गुरुः ॥ दक्षे यमो गुरुः पातु नैरृत्यां गुरुर्नैरृते ॥ १५ ॥ वरुणो गुरुः पश्चिमायां वायव्यां मारुतो गुरुः ॥ उत्तरे गुरुर्ध
नदो ईशान्यां ईश्वरो गुरुः ॥ १६ ॥ ऊर्ध्वं पातु गुरुर्ब्रह्मा ह्यनंतो गुरुरव्ययं ॥ एवमिंद्रादयो रक्षां कुर्वंतु गुरवो

© Dharmartha Trust J&K. Digitized by eGangotri

3

मम ॥ १७ ॥ श्रिरसः पादपर्यंतं पातुदृष्टौ च सिद्धये ॥ मानवो ध्यात्वा गुरुदेवः पिंडं च व्यापकस्तथा ॥ १८ ॥ गु
रुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवमहेश्वरः ॥ गुरुरेकपरंब्रह्म तस्मै श्रीगुरवे नमः ॥ १९ ॥ परानंदः परंब्रह्मं प
रंपूर्णप्रकाशकं ॥ परज्योतीपरंतत्वं परमहंसपरात्परं ॥ २० ॥ ईश्वरोवाच ॥ श्रृणु देवी परंतत्वं गु
ह्याद्गुह्यमुत्तमं ॥ दुर्लभं देवदैत्यानां सर्वपापनिवारकः ॥ २१ ॥ करुणात्मा कृपासिंधुर्मुक्तिश्चिंताम
णिः सदा ॥ विमलं च चतुर्वेदा मंत्रशास्त्रमनेकधा ॥ २२ ॥ पिबंति सारं तत्वज्ञस्तत्क्रमुक्त्यं पंडिता ॥
कृत्यसारमम्रतं मुनीमोरूपरायणं ॥ २३ ॥ आनंदकारणोज्ञानशांतरूपायवैनमः ॥ नमस्ते गुरुदे
वाय परमानंदरूपिणे ॥ २४ ॥ रुद्रकायमरुकायवरुद्धीरूपायवैनमः ॥ परमानंदरूपायविश्व
रूपायवैनमः ॥ २५ ॥ नमः पूर्णप्रकाशायविश्वबीजायवैनमः ॥ विद्याधरायवैतुभ्यं विद्याक ॥ राम ॥
रायवैनमः ॥ २६ ॥ नमस्तेस्तुअनंताय अनादिनंतायवैनमः ॥ निरंजननिराकारनमः संसारपा ॥ ३ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्मने ॥२७॥ स्तोत्रं वै गुरुदेवस्य गुह्याद्गुह्यतरं परं ॥ दीपकं मंत्रराजानां सर्वकिल्बिषनाशनं ॥२८॥ सर्व
विषापहरणं सर्वरोगादिनाशनं ॥ व्याघ्रचौरादिशमनं मारीभयविनाशनं ॥२८॥ संग्रामे शत्रुसंक
टे सागरे पर्वते वने ॥ श्मशाने दुष्टसंघे च भयनाशकरं परं ॥३०॥ एतत्स्तवठने नित्यं पाठयेद्वूसमा
हितः ॥ मुच्यते सर्वपापेभ्यो निर्भयो जायते नरः ॥३१॥ अच्छावान्तपसा साधुर्योगीयोगो जायते चिरान्
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥३२॥ लभते सर्वसिद्धिं च त्रैलोक्यं वशमानयेत् ॥ न पुनः प्रप्प
ते योनिगर्भवासो न जायते ॥३३॥ साधनं वर्त्तिसद्गुरुः मुच्येत्संसारसंकटात् ॥ सर्वसिद्धिप्रदो मन्
त्रो गुरुस्सानिध्यतो व्रजेत् ॥३४॥ लभेद्धैकवाद्गुनं मंत्रं पुरश्चर्याविधिक्रमतः ॥ सकलं सिद्धिमाप्नोति गुरो
पादानुचिंतनात् ॥३५॥ गुरुर्माता पिता भ्राता सर्वे चैव सहोदर ॥ तत्वं गुरोपरं नास्ति सर्वदेवमयो मतः ॥३६॥
पठंति वेदशास्त्राणि यारो मंत्रशास्त्रमनेकधा ॥ गुरुमंत्रविहीनानां सिद्धिर्नैवोपजायते ॥३७॥ सर्वेत्र गुरुरु

© Dharmartha Trust J&K. Digitized by eGangotri

॥गु.क.॥
॥४॥

पेत्ददृश्यते साधको नमः॥ स्वात्मानं गुरुरूपत्वं ध्यात्वा वं मंत्रविद्वदेत्॥ ३८॥ इत्येवं गुरुकवचं त्रैलोक्ये
पि दुर्लभं॥ नवप्रीत्यामयाख्यातं न कस्य कथितं प्रिये॥ ३९॥ एआकाले पठेद्यस्तु जपकाले विशेषतः॥ त्रैलो
क्ये दुर्लभं देवी भुक्तिमुक्तिप्रदायकं॥ ४०॥ सर्वमंत्रफलं तस्य सर्वयंत्रफलप्रदं॥ सर्वतीर्थप्रदं देवी पठले
कवचं गुरो॥ ४१॥ अष्टगंधेन भूर्जे च लिखित्वा वेष्टनं त्र संयुतं॥ कवचं गुरुपद्भुजा च भक्त्या च मस्तु भवास
रे॥ ४२॥ गजवेधूपदीपाद्यैः सुधापिप्रांत संयुतं॥ तथैव मुक्त्र मंत्रेण साधकः शुद्धचेतसा॥ ४३॥ धार
येत्कवचं देवी ग्रहभूतभयं नहि॥ पठितव्यं त्रिकालं हि सम्मुक्तो भवबंधनात्॥ ४४॥ इत्येवं गुरुकवचं प
रात्परतरं दिव्यं घोरघोरविघोषवान्॥ मानेऽघाः क्रममस्तपापरगुरोस्सा खातुरोसंस्थितं॥ भक्त्या देवि क
मंत्रराजसहितं चिंतांबुजे श्रीगुरुं॥ ध्यात्वा श्रीरचलं कविलमपरं स्वं ते च मुक्तिं व्रजेत्॥ ४५॥ इति
श्रीरुद्रयामले॥ ३॥ उमामाहेश्वरसंवादे मंत्रसारोद्धारे श्रीसद्गुरुकवचं स्तोत्रं संपूर्णं॥ शुभं भूयात्॥

॥राम॥
॥८॥

© Dharmartha Trust J&K. Digitized by eGangotri